प्रथमः पाठः
१

# मङ्गलाचरणम्



सरस्वति! नमस्तुभ्यं, वरदे कामरूपिणि।
विद्यारम्भं करिष्यामि, सिद्धिर्भवतु मे सदा ।। १ ।।

त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव-देव ।। २ ।।

सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु, मा कश्चिद् दुःखभाग् भवेत् ।। ३ ।।

## भावार्थः

१. हे वरदायिनि ! हे इच्छारूपिणि सरस्वति ! तुभ्यं नमः । अहं विद्यायाः आरम्भं करिष्यामि । अस्यां विद्यायां सदा मम कृते पूर्णतायाः प्राप्तिः भवतु ।

२. हे ईश्वर ! त्वम् एव माता असि, त्वम् एव पिता असि । त्वम् एव बन्धुः असि, त्वम् एव सखा असि। त्वम् एव विद्या असि, त्वम् एव धनम् असि । हे देवाधिदेव ! त्वम् एव मम सर्वस्वम् असि।

३. सर्वे प्राणिनः सुखिनः भवन्तु, सर्वे नीरोगाः भवन्तु, सर्वे कल्याणं पश्यन्तु, कोऽपि प्राणी दुःखी न भवेत्।

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| सरस्वति ! | हे शारदे ! | हे सरस्वती ! (सम्बोधन) |
| नमस्तुभ्यम् | तुभ्यं नमः | तुम्हें नमस्कार |
| वरदे ! | वरदायिनि ! | हे वर देने वाली ! |
| कामरूपिणि ! | इच्छारूपिणि ! | हे इच्छारूपिणी ! |
| विद्यारम्भम् | विद्यायाः आरम्भम् | विद्या का आरम्भ |
| करिष्यामि | विधास्यामि | करूँगा |
| सिद्धिर्भवतु | पूर्णता भवतु | पूर्णता हो |
| मे | मम | मेरी (मुझे) |
| सदा | सर्वदा | हमेशा |
| बन्धुः | सम्बन्धी | सम्बन्धी |
| सखा | मित्रम् | मित्र |
| द्रविणम् | धन–ऐश्वर्यादिकम् | धन–सम्पत्ति |
| सर्वम् | सर्वस्वम् | सब कुछ |
| मम | मे | मेरा |
| देव–देव ! | देवानां देव ! | हे देवों के देव ! |
| सर्वे | सर्वे (प्राणिनः) | सभी (प्राणी) |
| भवन्तु | सन्तु | हो/होवें |
| सुखिनः | सुखयुक्ताः | सुखी |
| निरामयाः | रोगरहिताः | नीरोगी |
| भद्राणि | कल्याणानि | कल्याण |

| | | |
|---|---|---|
| पश्यन्तु | अवलोकयन्तु | देखें |
| मा | न | नहीं |
| कश्चिद् | कोऽपि | कोई |
| दुःखभाग् | दुःखी | दुःख का भागी |
| भवेत् | भवितव्यः | हो |

## अभ्यासः

**( १ ) उच्चारणं कुरुत –**

| | | | |
|---|---|---|---|
| सरस्वति ! | नमस्तुभ्यम् | कामरूपिणि ! | विद्यारम्भम् |
| सिद्धिर्भवतु | त्वमेव | बन्धुश्च | द्रविणम् |
| निरामयाः | भद्राणि | कश्चिद् | दुःखभाग् |

**( २ ) मञ्जूषातः उचितं पदं चित्वा रिक्तस्थानानि पूरयत –**

द्रविणं  माता  कश्चिद्  सरस्वति !  सुखिनः

(क) ........................ नमस्तुभ्यम्।

(ख) त्वमेव ........................ च पिता त्वमेव।

(ग) त्वमेव विद्या ........................ त्वमेव।

(घ) सर्वे भवन्तु ........................ ।

(ङ) मा ........................ दुःखभाग् भवेत्।

**( ३ ) परस्परं सुमेलयत –**

| | | |
|---|---|---|
| (क) | विद्यारम्भं | सखा त्वमेव |
| (ख) | त्वमेव बन्धुश्च | पश्यन्तु |
| (ग) | त्वमेव सर्वं | करिष्यामि |
| (घ) | सर्वे सन्तु | मम देव-देव। |
| (ङ) | सर्वे भद्राणि | निरामयाः। |

**अध्यापकाय निर्देशः –**

- अध्यापकः प्रदत्तश्लोकानां सस्वरवाचनं कारयेत्।
- श्लोकानां कण्ठस्थीकरणं कारयित्वा छात्रान् प्रार्थनासभायां प्रस्तोतुं प्रेरयेत्।

## योग्यता-विस्तारः

१. प्रियाः छात्राः ! प्रथमे पाठे वयम् ईश्वरस्य स्मरणं कृतवन्तः । यथा वयं पुस्तकस्य आरम्भे ईश्वरस्य स्मरणं कुर्मः तथा एव दिनस्य आरम्भे अपि ईश्वरस्य स्मरणार्थं करतलदर्शनेन सह एनं श्लोकं वदामः:-

**कराग्रे वसते लक्ष्मीः, करमध्ये सरस्वती ।**
**करमूले तु गोविन्दः, प्रभाते करदर्शनम् ।।**



२. भूमिः अस्माकं माता अस्ति किन्तु वयं प्रतिदिनम् अस्याः उपरि चलामः, पादाभ्यां स्पर्शं कुर्मः । अतः क्षमायाचनार्थं प्रातः काले एनं श्लोकं वदामः -

**समुद्रवसने! देवि ! पर्वतस्तनमण्डले !**
**विष्णुपत्नि! नमस्तुभ्यं, पादस्पर्शं क्षमस्व मे ।।**



**अध्यापकाय निर्देशः -**

। अध्यापकः बालकैः एतयोः श्लोकयोः सस्वरं गायनं कारयेत् । श्लोकानां भावविषये अपि चर्चां कुर्यात् ।

## वर्ण-विलासः

हिन्दीभाषायाः वर्णमालां भवन्तः पूर्वकक्षासु पठितवन्तः । यथा - हिन्दीभाषायाः वर्णमाला भवति, संस्कृतभाषायाः वर्णमाला अपि प्रायशः तथा एव भवति । आगच्छन्तु संस्कृतवर्णमालां जानीमः -

# संस्कृत-वर्णमाला

## स्वराः

| | | | | | | |
|---|---|---|---|---|---|---|
| अ | आ | इ | ई | उ | ऊ | ऋ |
| ॠ | ॡ | ए | ऐ | ओ | औ | |

## व्यञ्जनानि

स्पर्शवर्णाः →

| | | | | |
|---|---|---|---|---|
| क् | ख् | ग् | घ् | ङ् |
| च् | छ् | ज् | झ् | ञ् |
| ट् | ठ् | ड् | ढ् | ण् |
| त् | थ् | द् | ध् | न् |
| प् | फ् | ब् | भ् | म् |

अन्तःस्थवर्णाः → य् र् ल् व्

ऊष्मवर्णाः → श् ष् स् ह्

चिह्नानि → : ( विसर्गः ) ं ( अनुस्वारः ) ् (हलन्तः)

## अक्षराणि योजयतु चित्रं रचयतु

